स्तुतिमणिमालिका

श्री न- च- रघुनाथाचार्यस्य कृतिः

062611

एवं रूपम्

062611

श्रीसंस्कृतविज्ञानवर्द्धिनीपरिषदः प्रथमं पुष्पम्

स्तुतिमणिमालिका



062611

कृतिकर्ता
श्री न- च- रघुनाथाचार्यः
एकशिलानगरम्

प्रतय: 500
कीलकवैशाखमास :
1968

Q2.4146
.N68

मुद्रणम्
विजयप्रेस- वरंगल्



प्राप्तिस्थानम्
श्री न- च- रघुनाथाचार्य :
16-151 करीमाबादरोड्
वरंगल् आन्ध्रप्रदेश:

प्रस्तावना



अयि भो स्सहृदया स्सुहृदया विद्वांसो विदांकुर्वन्तु प्रागुक्ति मास्माकीनाम्। "यत्, अत्रैकशिलानगर्यां संस्कृतस्य प्रचाराय प्रसाराय च वर्षद्वयात् प्राग् व्यवस्थापिता संस्कृतविज्ञानवर्द्धिनी नाम परिषत् नियतसमयसंपन्नै स्समावेशै, र्विशिष्टाभि र्गोष्ठीभि, र्विषयविशदीकरणचणै र्व्याख्यानै, स्सरलसंस्कृतपरीक्षाभिश्च फलेग्रहिं संस्कृतव्यवसायं करोतीति"। संस्कृतस्य वृहत्प्रचार माकांक्षद्भि रस्माभि र्ग्रन्थप्रकाशनमपि समुददिश्यत। यदद्य श्रीमतां धीमतां करकमलयो स्समर्प्यते। श्रीमन्तो न- च- रघुनाथाचार्य-महोदया लब्धवर्णेष्वग्रण्यः बहोः कालात् संस्कृते शास्त्रीयामुदात्तां कृपिं कुर्वन्ति। ये च स्वकीयशास्त्रपाण्डित्येन विस्मयमानैः श्रीमद्भिः महामहोपाध्याय, शास्त्ररत्नाकरेत्यादि विरुदाङ्कितैः के. यस्-कृष्णमूर्तिशास्त्रिवर्यैः "कविशाद्विकेसरीति" विरुदप्रदानेन स्सम्मान्यन्त। ते रेभि स्सकलशास्त्रपारदृश्वभिः श्रीमद्भिः न- च- रघुनाथाचार्यपादै स्समन्वर्धा स्तुतिमणिमालिकाख्या कृतिः प्रथमो-पहारतया विदुषां करकमलयो स्समर्प्यते। यस्या गुरुतां, भावस्य गभीरतां, रीते रुदारतां, पदप्रयोगस्य विचित्रतां, कल्पनाया अनल्पता ञ्चावलोक मवलोक माश्चर्यमधिक मनुभवद्भि 'रभि-नवविद्यानाथ' ब्राह्मीभूषणेत्यादिविरुदाङ्कितैः 'विद्वानेव विजानाति विद्वज्जनपरिश्रम' मिति सुभाषितं सार्थकतया सुवासयद्भिः

श्रीमद्भिः व्याकरणशिरोमणि चेलमचेर्ल रङ्गाचार्यमहोदयैः ग्रन्थप्रकाशनाय चास्मान् प्रेरयद्भिः परिषदेऽस्यै पञ्चाशदुत्तरं द्विशतं धनं समार्प्यत। ग्रन्थस्याऽस्य प्रकाशनाय स्वाङ्गीकारं सूचयद्भ्यः न- च- श्रीरघुनाथाचार्यपादेभ्यः, धनसाहाय्येन चास्मान् कृतार्थयद्भ्यः श्रीचेलमचेर्ल रङ्गाचार्यमहोदयेभ्यश्च हार्दिका धन्यवादास्तप्रश्रयं वितीर्यन्ते।

इति

भवदीयौ

गौरवाध्यक्षः आवंच वेंकटरायः (Adocate)

कार्यदर्शी: S. B. विजयसारथिः B. O. L.

संस्कृत विज्ञानवर्द्धिनी परिषत्

एकशिलानगरम्



श्रीः

प्राथमिकं विज्ञापनम्

मान्याः! पाठकमहोदयाः!

आदौ इदमवदधतु तत्र भवन्तः॥

तत्तदवसरेषु सत्त्वोन्मेषसमाहितस्वान्तैः अस्माभिः भगवति वाचिकं कैङ्कर्यमाधित्समानैः प्रणीतानि पद्यानि "स्तुतिमणिमालिका" नाम्ना साम्प्रतमवतार्यन्ते। त्रयाणामिह स्तुतिमणिसराणां सन्दर्भणमवधेयम्। यथा- (१) श्रीशेषाद्रीशस्तुतिः- (२) श्रीरङ्गपतिस्तुतिः- (३) दिव्यदेशाधीशस्तुतिः- इति॥

तत्र, पञ्चदशवर्षेभ्यः पूर्वमेव प्रथमतः श्रीशेषशैलमध्यासितवद्भिः अस्माभिः सन्दब्धा भगवतः श्रीनिवासस्य स्तुतिः अन्ते कतिपयद्रविडदिव्यगाथानुवादेन शतकात्मना परिपूरिता प्रथमसर इति प्रकाश्यते॥- अथ, चिरादपि उत्कटां श्रीरङ्गपतेः सिषेविषां मनसि बिभ्राणा वयं, प्रतिहन्यमनाश्च बहुशो विघ्नैरतर्कितोपनतैः, अन्ततो नैराश्येन भगवन्तं प्रति यद्यदाक्रन्दाम; यच्च तेनैव प्रसन्नेन अस्मज्जन्मसाफल्यमाधित्सुना यात्रावशात् श्रीरङ्गनगरं प्रापिताः विश्वावसुसंवत्सरे श्रीवैकुण्ठैकादश्यां स्वदिव्यमङ्गलविग्रहसेवां प्रथममुपलम्भिताश्च आनन्दातिरेकादभ्यनन्दाम; यच्च तद्विषयिणीः कतिदयद्रविडदिव्यगाथाः संस्कृतेऽन्ववदाम; तत्सर्वं श्रीरङ्गपतिस्तुतिरूपेण द्वितीयसर इति प्रकाश्यते॥-

ततः तमेवावसरं पुरस्कृत्य कतिपयेषु तत्तद्दिव्यदेशेषु श्रीकांचीप्रभृतिषु पर्यटद्भिरस्माभिः तत्तत्क्षेत्राधिपतीन्प्रति प्रणीतानि स्तुतिपद्यानि आहृत्य दिव्यदेशाधीशस्तुतिरूपेण तृतीयसर

इति आविष्क्रियते। तथा, अस्मज्जन्मभूमौ कृष्णामण्डलान्तर्गते मोटूरुग्रामे, श्रीगोदापुरप्रान्ते, अस्मत्प्रप्रपितामहपादैः श्री न. च. तिरुमलाचार्यनामभिः शतवर्षेभ्यः पूर्वं प्रतिष्ठापितस्य अस्मत्कुलदैवस्य श्रीमतो जानकीजानेः भगवतः स्तुतिरपि श्रीजानकीस्तुत्या सह अत्रैव तृतीयभागे अन्ते संयोजिता।। एवं भगवद्भागवतमुखोल्लासाय कल्पेत स्तुतिमणिमालिका सेयमिति प्रतीमः।।-

कृतज्ञताविष्करणम्


सम्प्रति प्राप्तमवसरं पञ्चषवाक्यविलेखनेन विनियुञ्जे। कृतज्ञतामप्रकाश्य स्थातुं न मया प्रभूयते। प्रशस्तं मत्कं सौजन्यं एवमनाविलं चिकीर्ष्यते।। जानीमः खलु इमां शास्त्रोक्तिम्-"यः कर्ता, स भोक्ता" इति। सर्वथापि एनां मयि व्यभिचारयितुं भगवान् श्रीनिवासः बध्दमुष्टिरिति प्रतिभाति। स खलु स्तुतिकुसुमानि मत्करात् जिघ्रन्थयिषति स्म। ग्रथितां पुनर्मालां श्रीमतो विद्वद्वरस्य चेलमचेर्ल रङ्गाचार्यस्य स्वभक्ताग्रगण्यस्य हस्तात् जिघृक्षते। इयं कृतिकन्या मदीया। एनां अन्यहस्तात् आदित्सते भगवान् दानफलं तस्मै दित्सुरिव। ईदृशेन भगवत्संकल्पेन परवशोप्ययं जनः निर्विचिकित्सं निरभ्यसूयं च हार्दमानन्दं आविष्कुर्वन् इत्थमाशास्ते; "स्तुतिप्रसन्नो भगवान् अर्थिजनकल्पशाखी श्रीमते रङ्गाचार्याय मुद्रणव्ययभरं वहते समस्तसन्मङ्गलानि तदभीप्सितानि स्वदित्सितानि च सतृणं प्रतिपादयन् परिपालयत्वेनं सकुटुम्ब"मिति।। एवं तत्प्रेमपात्रतया मामपि भगवान् कटाक्षयेत्, इत्यत्र कस्सन्देहः?

इति विज्ञापयिता
श्री. न. च. रघुनाथाचार्यः
(कृतिकर्ता)

श्रीरस्तु

स्तुतिमणिमालिकायां

श्रीशेषाद्रीशस्तुतिः



स्वस्ति शेषगिरिमस्तभूषणं,
विस्तृणीत कमलापति र्मयि।
यं समस्तजगदेककारणं
लक्ष्मणार्यमुनिराडभाषत ॥ १

स्तोतुं त्वां स चतुर्मुखः, स च महाभोगी, त्रयी साप्यहो
मूका एव भवन्ति शेषमहिभृत्स्वामिन् ! गुणाम्भोनिधे !
एवं सत्यपि यन्मितंपचमतिः स्तोत्रे तव स्तोकवाक्
सन्नह्यामि, तदत्र हेतुरभवत् त्वत्पादभक्तिर्दृढा ॥ २

श्रीशेषाद्रौ नित्यवासैकधन्याः,
भक्ताः प्रापुः त्वद्दयां त्वां स्तुवानाः
स्तुत्वा लिप्सुः पद्यबन्धैः कृपां ते,
दूरे तिष्ठन्नस्मि नोपेक्षणीयः ॥ ३

वृषगिरिपते रौदार्यं किं भणामि, पदाब्जयोः
सकृदपि नतं पुष्णाति द्राङ्महेन्द्रपदाश्रयम् ,
कलुषहरणं नाम स्वस्याथ यस्सकृदुच्चरेत्
सरसकवितासाम्राज्यस्य प्रभुं विदधात्यमुम् ॥ ४

मेदुरं बहुफलैर्महीरुहैः
भासुरं च विमलैर्जलाशयैः
शेषशैलमधिरुह्य दीप्यते
भक्तरक्षणचणः परः पुमान् ॥ ५

उद्यानेषु फलावनम्रविविधक्षोणीरुहोद्भासिषु
भ्राम्यत्सारसमण्डितासु विकसत्पद्मासु वापीष्वपि
प्रेयस्या प्रणयानुवृत्तिपरया क्रीडारसं निर्विशन्
शेषाद्रौ धृतकौतुकः [1]कलभकः कुर्यात्प्रमोदं मयि ॥ ६

सृष्टिस्थितिप्रलयरूपतया प्रसिद्धा
नाट्यक्रिया रसघना भुजगाद्रिभर्तुः
यन्मानसप्रसदनैकफलः प्रयासः
वृष्टिं रमा शुभमयीं मयि सा कृपीष्ट ॥ ७

श्रीमन्महारसिकशेषधराधिनाथ-
शृङ्गारयोग्यगुणवैभवभासुरांग्यौ
देव्यौ मुहुर्घटयतां मयि भूमिनीले
संसारदावपरितापहरान् कटाक्षान् ॥ ८

नित्याप्तकाम इति वेदशिरस्तुतोऽपि
यन्मौलिवासितसुमस्रजि बद्धकामः
तल्लब्धये स्पृहयते भुजगाद्रिनेता
सा विष्णुचित्ततनया भवताद्गति मे ॥ ९

---

[1] कलभकः करिपोतः । अत्र भगवतः तथात्वेन अध्यवसायः ।

सेनानी श्शरणं ममास्तु सततं श्रीसूत्रवत्या स्सखा
शेषाद्रीशदिदृक्षया परिगतैः ऐश्वर्यदर्पाविलैः
सम्मर्दाक्षमरोषरूक्षविचलद्वेत्रदण्डाहति-
त्रुट्यन्मौलिकिरीटकोटिमणिभिः सुत्राममुख्यै स्स्तुतम् ।। १०

यत्सूक्तयः सकललोकनिषेवणीयाः
वेदातिलंघिविभवाः भवतापहन्त्र्यः
शेषाद्रिराङ्गुणसुधाह्रदगाढमग्नाः
ते सूरयो दश दिशन्तु मयि प्रसादम् ।। ११

[1]श्रीदेव्याः कमनीयहारतरले देवोऽथ तत्कौस्तुभे
सा चेति, स्फुटबिंबनौ वृषमहाभूभृद्विहारोत्सुकौ
अन्योन्यं निजमानसे दृढतरध्यानावबद्धाकृती
भूयास्तां प्रतिभासिताविव बहिः, दिव्यौ युवानौ श्रियै १२

अनन्तगिरिमाश्रये, हरितसस्यवस्त्राढ्यया
हरौ विहरणोत्सुके सह भुवा प्रवंच्य श्रियम्
विचित्रमणिदीपिकाविलसिता गुहारूपिणी
यदीयफणमण्डली विपुलचन्द्रशालायते ।। १३

प्रांचद्बाहुप्रांशुशाखासमग्रः
हेतिज्वालावेल्लनै स्सप्रवालः
मोक्षाभिख्यं सैष दद्यात्पुमर्थं
शेषक्ष्माभृत्कल्पशाखी सदा नः ।। १४

---

[1]श्रीकृष्णदेवरायविरचिते "आमुक्तमाल्यदा" नामनि आन्ध्रकाव्ये स्थितस्य आद्यपद्यद्वयस्य इमौ 12- 13- श्लोकौ संस्कृतानुवादरूपौ। तत्र 13 श्लोके अनन्तस्य गिरित्वेन वर्णनं विशेषः ।।

वृद्धिं प्राप्तं मत्कचेतोगुहायां
हर्तुं शक्यं यन्न तेजोऽन्तरेण
अज्ञानाख्यं हन्तु तन्मेऽन्धकारं
शेषक्ष्माभृन्मौलिमाणिक्यदीपः ॥ १५

जननमृतिलताप्रतानवीतं
क्षितिरुहशालि च काममुख्यदोषैः
वृषगिरिशिखराश्रयः कृशानुः
दुरितवनं मम भस्मसात् करोतु ॥ १६

आश्रित्य यत्पदसरोजयुगं बुधानां
सोऽयं भवाब्धिरपि पल्वलवद्विलंघ्यः
शेषक्षमाधरपतौ प्रचकास्तु तस्मिन्
आदेहपातमनिरुद्धगति र्मतिर्मे ॥ १७

[1]अनश्वरवयस्स्फुरत्त्रिदशवारयोषिद्वृतां
न शक्रपदवीं न च क्षिततलाधिपत्यं वृणे
स्रवन्मधुसुमाटवीसुरभिशेषशैलोल्लस-
त्सरश्शफरजन्मकृद्भवतु भागधेयं मम ॥ १८

शरणीकृताहिधरणीधरस्य तरणीन्दुलोचनभृतः
करुणारसैकवरुणालयस्य वरणीयसद्गुणनिधेः
शरणं व्रजामि चरणद्वयं तदरुणाब्जतुल्यसुषमं
प्रणतामरौघमणिभृत्किरीटकिरणावलीवलयितम् ॥ १९

---

[1]अयं श्लोकः श्रीकुलशेखरसूरेः "आनादशेत्वत्तु" इत्यस्याः द्रविड गाधायाः विवर्तः

अहमतिभयकारिसंसारवार्द्धेरमुष्मात् द्रुतम्
वृषगिरिपतिपादसद्भक्तिसौवर्णनिश्रेणिकाम्
दृढतरमवलम्ब्य धैर्येण गन्ता तदूर्ध्वं पदम्
विलसति तमसः परस्तात् यदानन्दसन्धायकम्॥ २०

वृषगिरिवरनाथ! मत्कस्य चित्तस्य संविभ्रतः
मदभरविशरारुदन्तावलस्येव दुश्चेष्टितम्
शुभतरमुपयातु ते पादयुग्मं दृढालानताम्
वहतु च करुणा तवैतस्य बन्धाय रज्ज्वाकृतिम्॥ २१

धृतरति विषयाख्यधत्तूरपुष्पे मनो मेऽनिशम्
वृषगिरिसुरभूजसत्कीर्तिगुच्छेषु भृंगीयतु
इदमतिशिशिरे विहन्तर्यघानां तदीयेऽमले
शुभतरगुणगांगपूरे सदा राजहंसीयतु॥ २२

प्रातः प्रांगणसीम्नि मार्जनविधिं निर्वर्त्य, पात्रादिकं
शुन्धन्, कूपजलं झटित्युपहरन्, तद्भुक्तशिष्टान्यदन्
कुर्वन् पादसरोजमर्दनमहिक्षोणीधरेश! अन्वहं
दास्यं सर्वविधं वृणे कृतमतिः त्वद्भक्तगेहेष्वहम्॥ २३

जातः पुण्ये वैष्णवानां कुलेऽहम्,
पूतस्वान्तः श्रीयतीन्द्रोक्तिजातैः।
त्वत्सान्निध्यं देहि देहावसाने,
मा भूदन्यज्जन्म शेषाद्रिनाथ! २४

इन्द्रैर्यदुपाहृतं सुरगणैरैश्वर्यदर्पाविलं,
तत्सर्वं वृषशैलनाथ! कुरुषे न त्वं कटक्षास्पदम्
यद्भक्त्या शबरीकुचेलविदुरैः अत्यल्पमप्यर्पितं,
विस्वादं तदपि प्रहृष्यति सुधाभोजं हि भुक्त्वा भवान्॥ २५

(युग्मम्) इन्द्राग्ने व्रज, पाश्वर्मेहि दहन, त्वं काल पश्चाद्भव
क्रव्यादाधिप दीपिकां कुरु करे, छत्रं वहापांपते!
वायो वीजय चामरं, धनपते त्वं प्राभृतान्यर्पयेः,
ईशानाश्रय पादमूलं, अखिलान्वेदान् विधे त्वं पठ॥ २६

भो भो स्तुंबुरुनारदौ कलयतं गीतिं मनोहारिणीं,
लीलालास्यमुदंचयध्वमधुना विद्याधरीणां व्रजाः,
सोयं भक्तजनावनाय भगवान् यात्रोत्सवं सेवते
वीथीषु, इत्यनुशासति स्म सकलान्देवान् वृषाद्रौ भटाः २७

[1]वन्दमानामरव्रातमौलिस्फुर-
त्पद्मरागप्रभाराजिनीराजितम्
अस्तु भद्रप्रदं शेषशैलप्रभोः,
पद्मगर्भारुणं पादयुग्मं मयि॥ २८

सा मे सान्द्रा वृषगिरिपतेः पादयुग्मांगुलीभ्यो
निर्गच्छन्ती नखरुचिझरी तापशान्तिं विधत्ताम्
धत्ते यस्याः खलु सहभुवं सोपि देवो वृषांकः
मौलौ मान्यां त्रिदशसरितं व्रह्महत्यानिवृत्यै॥ २९

---

[1]२८ श्लोकमारभ्य पादादिकेशान्तवर्णनं भगवतः।

गुल्फौ सुवर्णोज्ज्वलनूपुरान्त-
रुत्कीर्णरत्नप्रभयानुविद्धौ।
देवस्य शेषाद्रिपतेः क्रियास्तां
संसारवार्द्धेः मम गुल्फदघ्नम्॥ ३०

वृत्तोज्ज्वले ते वृषशैलनेतुः
मदीयपापप्रशमं विधत्ताम्।
जंघे, वहन्त्यौ जगतीजयोद्य-
दनंगसौवर्णनिषंगशोभाम्॥ ३१

शरीरलावण्यझरीसमुद्य-
दूर्ध्वभ्रमिद्वन्द्वविभावनीया।
वृषक्षमाभृद्रमणस्य नित्यं,
जानुद्वयी सा जनयेच्छुभं नः॥ ३२

जगत्त्रयीहर्म्यधुरां दधानौ,
स्तंभायमानौ भुजगाद्रिनेतुः
ऊरू भजेतां परिदुर्बलेन
कथं प्रकांडेन तुलां कदल्याः? ३३

कटीतटोद्भासि शुभं विधत्तां
तदंशुकं शेषधराधिपस्य।
कादम्बिनीमध्यचिरावभासि-
सौदामिनीसंभृतसौहृदं नः॥ ३४



घटयतु मंगलानि मयि सापि नितम्बतटी
विविधमणिस्फुरत्कनकमेखलया कलिता।
प्रकुपितमातृबद्धशणरज्जुविघर्षवश-
स्फुटितकिणांकितेव भुजगाधिपशैलपतेः॥ ३५

नाभिर्वृषाद्रीश्वर ! तावकीना
सेयं गभीरा सरसीत्यमिथ्या।
जातं जगत्सृष्टिकरस्य धातुः
उत्पत्तिहेतु र्जलजं यदत्र॥ ३६

वलित्रितयभासुरः सुभगरोमरेखावृतः
धृताखिलजगद्धरो ऽप्यदिजहत्स्वकं तानवम्।
मृकंडुसुतवीक्षिताखिलविशेषतत्वाश्रितः
क्षिपेद्दुरितसन्ततिं वृषगिरीशकुक्षिर्मम॥ ३७

परिष्कृतं कौस्तुभरत्नभासा
विहारसौधायित मिन्दिरायाः।
त्रायेत मां मौक्तिकहारदीप्रं,
वक्षस्थलं तद्वृषशैलनेतुः॥ ३८

सौवर्णक्षितिधरसानुवद्विशालं
चक्षुर्भ्यां कलितनिमेषविस्मृतिभ्याम्
अम्लानद्युतिवनमालया पिनद्धं
दोर्मध्यं फणिशिखरीशितुः निपेवे ३९

S.V. VIDYAPEETHA LIBRARY
062611
TIRUPATI

दीव्यन्तीं भुवनावनाय विधृतैः रक्षोगणक्षोभणैः,
हेतीन्द्रैः, अभिकांक्षितार्थविवृतौ तां कल्पशाखायिताम्
केयूरद्युतिरंजितां वृषगिरीशानस्य वृत्तोज्ज्वलां,
सेवे बाहुचतुष्टयीं शुभकरीं भोगीन्द्रभोगायताम्॥ ४०

अपायान् सदा मे व्यपोहेद्रथांगः
वृषक्ष्माधरेशस्य हस्तावलंबः।
निकृत्तारिकंठक्षरद्रक्तपूरैः
अकाले।त्थसन्ध्यायितक्षोणिभागः॥ ४१

RSVL 62611

वैरिहृत्पुटकवाटभेदनो-
दग्रनिष्ठननशालिनं मुहुः।
शेषभूधरपतेः करांबुजे
राजहंसमिव शंखमाश्रये॥ ४२

मौर्वीनिर्घोषमन्त्रैस्त्रिदशरिपुगणं दूरमुच्चाटयन्ती।
शार्ङ्गाभिख्या फणीन्द्रक्षितिधरभगवद्बाहुशीर्षं श्रयन्ती।
लीलां नीलांबुदोद्यत्सुरपतिधनुषश्चापवल्ली वहन्ती
पापौघानां विपाकं प्रशमयतु मयि प्रत्यहोदित्वराणाम्॥ ४३

करकमलकृताश्रयो मुरारेः
भुजगधराभरणस्य नन्दकाख्यः।
द्यतु दुरितवनं स नः कृपाणः
निशिचरवंशविनाशधूमकेतुः॥ ४४

सेनांबुधौ सकलदृप्तनिशाचराणां
कौमोदकी कलितमन्दरसम्भ्रमैषा।
भोगीन्द्रभूधरपतेः करपद्मलग्ना
क्षिप्रं गदा प्रशमये दखिलं गदं नः॥ ४५

दृप्तोग्रदानवहृदन्तरगाढरूढम्
उत्पाट्य दर्पमितं भयमादिशन्ती।
शेषाद्रिकल्पतरुपल्लवतल्लजश्रीः
पंचायुधी विदलयेत् प्रबलं मदंहः॥ ४६

रेखात्रयेण ऋजुना घटितस्तिरश्चा
विभ्रत्कराब्जधृतकंबुवरस्य शोभाम्।
कंठो वृषाद्रिरमणस्य परिष्कृतस्यात्
मत्प्रत्तभक्तिसुरभिस्तुतिमालिकाभिः॥ ४७

मन्दस्मितं धवलकान्ति अरुणाधरश्री-
सम्मिश्रितं भुजगभूधरनायकस्य।
भायात्पुरः स्फुटजपाकुसुमानुषंगि-
कंबुप्रभाघटितसौहृदमस्मदक्ष्णोः॥ ४८

यासां पोषितसम्पदां नतजनत्राणैकदीक्षाजुषां
वांछन्ति क्षणमात्रपात्रपदवीं अब्जासनाद्या सुराः।
मव्यंभोरुहनिस्सरन्मधुकरश्रीबद्धसख्याश्चिरं।
ताश्शेषाद्रिपतेः पतन्तु करुणासान्द्राः कटाक्षच्छटाः॥ ४९

उद्यच्छारदपूर्णचन्द्रनियुतस्पर्धाकरं, भास्वरं
वक्त्रभ्रूयुगलेन, मान्मथधनुर्वल्लीसमुल्लासिना।
कारुण्यामृतवर्षिनेत्रयुगलं तद्वक्त्रमासेवितुं
दिश्यान्मे करुणामयो वृषगिरीशान स्सहस्राक्षताम्॥ ५०

तिरस्कृता वक्त्रशशिप्रभाभि:
किरीटभूभृत्पदमाश्रयन्ती।
लीना तदन्तस्तिमिरच्छटेव
वृषाद्रिनाथस्य शिरोजराजि:॥ ५१

प्रणयकुपितां देवीं क्षीराम्बुधे: प्रियपुत्रिकां
चरणयुगले मौलिं न्यस्य प्रसादयतो हरे:।
कृतपरिचयो लाक्षारागै: किरीटवरोऽनिशं
जयति नखरारुण्यं संश्लेषलग्नमिवोद्वहन्॥ ५२

आनन्दैकनिधान मद्भुतरसप्रस्यन्दि भोगीश्वर-
क्ष्माभृन्नित्यनिवासिनो भगवत: प्रत्यंगलावण्यकम्।
निर्लज्ज: स्ववचोभिरल्पविषयै: भूयिष्ठदोषास्पदै:
अत्रैवं प्रतिपादयन्नपयशोराशिं चिचीषाम्यहम्॥ ५३

यद्यदेव फलमर्थितं जनै:
तत्तदाशु वितरत्यहो भवान्।
वैभवं तव किंलातिमानुषं
निह्नुवीत न कदापि नास्तिक:॥ ५४

नो वेदाध्ययनं कृतं, न विहितो धर्मो मयानुष्ठितः
शान्त्याद्येषु गुणेषु कोऽपि न मयि श्रीनाथ! विद्योतते।
श्रीरामानुजपादयोः भवति मे भक्तिः किलात्यन्तिकी
सोयं त्वामुपसर्पितुं प्रभवति श्लाघ्योधिकारो मम॥ ५५

श्रीभूभ्यां प्रणयात्सदाप्युभयतः संसेवितः पार्श्वयोः।
हेतीन्द्रैरपि नित्यमण्डितचतुर्हस्तो लसत्कौस्तुभः।
श्रीमन्! शेषगिरीश! भास्करशतन्यक्कारिभास्वन्मुख!
द्रागारुह्य खगेश्वरं वद कदा मां त्रातु मायास्यसि॥ ५६

हित्वा त्वदीयपदपंकजसेवनेच्छां,
धृत्वा कुरंगनयनास्वनिशं च मोहम्।
विस्मृत्य शेषगिरिनाथ! हृदि स्थितं त्वां,
कामस्य हन्त वशगो निपताम्यधोधः॥ ५७

त्वदत्तमिन्द्रियकलेबरजातमेतत्
आदाय हन्त! [1] भवतोऽपि नहि स्मरामि।
अन्नस्य दातरि सदा स्थिरभक्तिभाजः
शेषाद्रिशेखर! शुनोऽपि निकृष्टजन्मा॥ ५८

उद्दूष्य भक्तनिवहं कटुभिर्वचोभिः,
आधाय च त्वयि सुदुर्विषहापचारान्।
शेषक्षमाधरपते! न तु वेद्मि सोऽहं
घोरेषु केषु नरकेष्वगतिः पतेयम्॥ ५९

---

[1] भवतः इति कर्मणि षष्ठी। मातुस्स्मरतीतिवत्॥

अनुभवन्नपि पापफलं भृशं
वृषगिरीश! तदेव करोम्यहम्।
प्रणयिनीव बहोर्जनिसन्ततेः
अनुगता प्रकृतिर्मम दुस्त्यजा॥ ६०

अध्यापितोऽपि बहुधा गुरुसार्वभौमैः
शास्त्राणि तत्त्वगतिलम्भनतत्पराणि।
भोगीन्द्रभूधरपते! न भवामि जातु
त्वत्पादसेवनविधौ विहिताभिलाषः॥ ६१

उद्वृत्तानि मदिन्द्रियाणि तरसा योगावबद्धान्यपि।
स्वैरं [1] नाथहरिं वृषं विवृणते स्वापेक्षया सुग्रहम्।
विन्देरन् भवतः पदाब्जयुगले वृत्तिं कथं वैतसीं।
शेषाद्रीश! समग्रशक्तिक! हृषीकेश! प्रमाणं भवान्॥ ६२

अथ भगवदवतारदशकवर्णनम्॥

समस्तजगतां जनिस्थितिलयैकहेतुं त्रयीं
पुरा निशिचरे हरति, उपगतोऽन्धतामात्मभूः।
वृषाचलपते! ततो जलधिमध्यगं राक्षसं
निहत्य शफरात्मना मनसि तस्य शान्तिं व्यधाः॥ ६३

मथनोद्यतेषु जलधेः कृपावशात्
दिविषत्सु देव! वहसे स्म कूर्मताम्।
तव वैभवं न खलु ये विजानते
ध्रुवमत्र ते दधति कूपकूर्मताम्॥ ६४

---

[1] नाथोनाम नासारज्जुः। तं हरति स्वीकरोतीति नाथहरिः। उध्दतो हि वृषभः नासारज्जुबन्धनेन वशीक्रियत इति प्रसिध्दिः। "हरतेर्दृतिनाथयोः पशौ" इति पाणिनेस्सूत्रम्

वृषाद्रीश ! कोलाकृते ! सान्ध्यराग-
स्फुरच्चन्द्ररेखासदृक्षा त्वदीया।
हिरण्याक्षवक्षस्स्थलीनिर्गतासृग्-
विलिप्ता विधत्तां शुभं दंष्ट्रिका नः॥ ६५

व्यर्थो वज्रप्रयोगः, प्रसरति न पुरः पट्टिशः, क्षीणवीर्या
शक्तिः, श्वैवं समस्तः प्रहरणनिकरो यत्र मोघप्रसारः।
तस्मिन्नक्षोभ्यसारे दनुजकुलपते र्वक्षसि क्रान्तिभाजः
शेषाद्रीशस्य दद्युश्शुभमिह नखराः नारसिंहाकृतेर्नः॥ ६६

दृप्यद्दैत्येन्द्रवक्षस्तटविघटनया स्पष्टकाठिन्यसाराः
वैयर्थ्यं वृत्त्यभावादपि नखरपदस्यात्मनि ख्यापयन्तः
तन्वाना स्वाश्रितानामपि पुनरभवं ते पुनर्भूपदाढ्याः।
चित्तं मे शेषभूभृन्नृहरिकररुहाः स्वांशुभिश्शोधयेयुः॥ ६७

उरसि पिहितां लक्ष्मीं मेणाजिनेन वितन्वता
प्रहरणगणं सर्वं दण्डात्मतां नयता द्रुतम्।
बलिमखजुषा भिक्षापेक्षालघुत्वमुपेयुषा
कपटवटुना शेषाद्रीशेन शेवधिमानहम्॥ ६८

वृषशैलनाथ ! बहवोऽनुदिनं
यदुपायनानि भवते ददते।
किमु तावता न तव तृप्तिरुदैत् ?
बलियाचने वहसि वामनताम्॥ ६९

"रुद्रोपार्जितशस्त्रविद्य" इति हि त्वं गीयसे, तद्ध्रुवं
रौद्रस्ते गुण एव सुप्रकटित: तत्रावतारे पुरा।
छिन्नक्षत्रियगात्रसंकुलगलद्रक्तप्रवाहै: प्रभो!
शेषाद्रीश! परश्वधस्य भवता चक्रे यत: पारणा॥ ७०

(युग्मम्) पुरहरकार्मुकोद्धृतिपणायितभूमिसुता-
करकमलात्तगन्धसुमनोमयमालिकया।
प्रथमकवीशवाक्तितिपणायितकीर्तिसती-
प्रणयरसाक्तयेव सितमौक्तिकमालिकया ७१

कलितभुजान्तरालं, अरुणाधरमध्यलस-
न्मधुरशुचिस्मितास्य मधरीकृतकाममदम्।
सकरुण-सारसारुण-विशालविलोचनभृत्
रघुकुलसंभवं जयति धाम वृषाद्रितटे॥ ७२

[1] आद्यजातमपि पुत्रकं प्रसू:।
नाभिनन्दति विषण्णमानसा।
प्रस्थिते त्वयि वनाय सीतया,
मुद्रितेव हृदये भवद्गुणै:॥ ७३

कान्तिभिस्तदमृतं प्रसुवानं,
तन्वदब्जशशिनोरवमानम्।
वीक्ष्य ते वदनमिच्छति योषिद्-
[2] भूयमात्मनि तपस्विजनौघ:॥ ७४

---

[1] "सुतं प्रथमजं दृष्ट्वा जननी नाभ्यनन्दत।" इति श्रीरामायणे अयोध्याकांडे वाल्मीकि:॥

[2] "योषिद्भूयं"-योषिद्भावं-"भुवो भावे" इति क्यप्।

निषङ्गादुद्धर्तुं, धनुषि शरमाधातु मथ तं
विमोक्तुं वा, कालस्त्रुटिरपि न मध्ये भवति ते।
इतीमां साश्चर्यं निशिचरपति स्ते निपुणतां,
मुहुः पश्यन् मोहाच्चलति, करचापं विसृजति॥ ७५

आर्द्रतामिति समस्तचेतसां,
तन्वतोऽनवधिकान् भवद्गुणान्।
नित्यमादिकविनानुभावितान्।
भोगिभूधरपते! जुषाम्यहम्॥ ७६

कृतसर्वहेतिपरिभावनयोः
भरणौ सदा मुसललांगलयोः।
यमुनानुकर्षणविदीप्तबलौ
शुभदौ वृषाद्रिरमणस्य भुजौ॥ ७७

शेषाद्रीश्वर! तावकं सुचरितं कृष्णावतारोद्भवं,
वात्सल्यादिगुणावलिप्रकटनं नानारसैकाश्रयम्।
विन्दन्तः कवयो विचित्रफणितीः व्यापारयन्तः क्षितौ
पूर्णानन्दरसस्वरूपविवृतौ न क्लेश माविभ्रते॥ ७८

धगद्धगितकुंडलद्युतिवितानदीप्रांबरं,
करीन्द्रकरटस्थलोत्पतितकेसरिप्रक्रमम्।
जवेन निजिघृक्षतः सपदि भीष्म मुत्तस्थुषः
स्मरामि हृदयेऽनिशं विजयसारथेस्सम्भ्रमम्। ७९

आस्तां स वेदः, स च सूत्रराशिः।
स्मृतीतिहासादिकमप्यनल्पम्।
तत्त्वं परं वेदयितुं त्वदीयं,
गीतामृतं नः परमं प्रमाणम्॥ ८०

अष्टाक्षरीविवरणं कलितद्वयार्थं,
पार्थाय यत्परमया दयया त्वदुक्तम्।
गीतामृतान्तिसवचः, तदकिंचनानां,
आलम्बनं वृषगिरीश्वर! माद्दशानाम्॥ ८१

त्रयीमनभ्यासवशाद्विलुप्तां,
धर्मव्यवस्थां विहतां च दुष्टैः,
त्रातुं वृषाद्रीश! कृपाणपाणिः
कदा त्वमाविर्भवितासि कल्किः? ८२

ओळ्ळिलक्कालम्

[1] कालेऽनन्ते सर्वदेशेष्वशेषां
सेवावृत्तिं दध्महे नित्ययुक्ताः।
तेजोराशेः निर्झरारावि-शेष-
क्ष्माभृन्नेतुः मत्कुलैकाश्रयस्य॥ ८३

अस्मद्वंश्यसमस्तपूर्वपुरुषाधारो निरस्तावधि-
श्रीकल्याणगुणोज्ज्वलो जलधरश्यामाभिरामाकृतिः।
स्वामी दीव्यति नित्यसूरितदधीशानादरोपाहृता-
म्लायत्कोमलपुष्पमाल्यसुरभौ श्रीवेंकटाद्रेस्तटे॥ ८४

---

[1] ८३ श्लोकादारभ्य श्रीशठकोपमुनीन्द्रविरचिते "तिरुवायमोळि", नामकद्रविडभाषामयसहस्रगीतिप्रबन्धे स्थितं "ओळ्ळिलक्कालं" "उलगमुंड" इत्येतदशकद्वयं श्रीशेषाद्रीशविषयकं संस्कृतश्लोकैरनूद्यते॥

स्वामी मायी सुन्दराब्जारुणाक्षः,
बिंबोष्ठोऽसौ नीलमाणिक्यकान्तिः
स्वच्छस्रोतश्शेषशैलाधिवासी
नित्यैर्मुक्तैश्चाभिषेव्यो गुणाब्धिः॥ ८५

दिव्यज्ञानसमिद्धसूरिपरिषत्स्वामीति मद्वावयतः
श्रीशेषाचलवासिनो भगवतः काश्चित् प्रसिद्धिर्भवेत्।
क्षुद्रे पापशतैरपाकृतगुणग्रामे च संगं दृढं
मय्याधाय चिराय रक्षितवतो नित्योज्वलज्योतिषः॥ ८६

ज्योतीरूपतयादिमूर्तिरखिलैः लोकैरसावाश्रितः
इत्युक्त्या न खलु प्रसिद्धिकणिकाप्येतस्य सम्भाव्यते।
आम्नायैकधनैः समस्तनिगमेष्वास्वाद्यमानः सुधा-
स्वादं यो निरवद्यसद्गुणगणः शेषक्षमाभृन्मणिः॥ ८७

आगामि, भूत, मखिलाघ समीषु तथ्यं,
नश्येत्, अर्मा विदधते स्वयमात्मनीनम्।
श्रीवेंकटेशपदपंकजयोर्य एव
बिभ्रत्यहो भुवि जना नम उक्तिकृत्यम्॥ ८८

सद्गंधानि सुमानि, निर्मलजलं, दीपंच, धूपं, करे
धृत्वा, सादरनित्यसूरितदधीशानैः प्रणामोत्सुकैः।
श्रीशेषाचल एष लब्धशिखरः शश्वत्परब्रह्मणा
साधर्म्यप्रतिपत्तिमुक्तिपदवीं अस्माकमाधास्यति॥ ८९

पातुं गोपान् तुमुलकरकावृष्टिपातात् धृताद्रिः।
पादाक्रान्त्या बलिहृतमहीं त्रातवानत्युदारः
पद्मानाथो यमधिगतवान्, सैष शेषाद्रिरेकः
शक्तोऽस्माकं भवति भजतां किल्बिषौघं विहन्तुम्॥ ९०

प्रणतार्तिहरस्य शेषभूभृ-
द्रमणस्यांबुजशोभिपादयुग्मम्।
करणत्रितयेन सन्दधानान्
रहयेत् वार्द्धकजन्ममृत्युदुःखम्॥ ९१

यावध्दातृविनिश्चितायुरवधिः नासन्नतामेष्यति।
स्याद्यावन् न तनुर्मनश्च विविधव्याध्याधिभिर्दूषितम्।
तस्मात्पूर्वं अहीन्द्रशायिवसतेः शेषाचलस्यादरात्।
तां सेवध्वमुपत्यकां कुसुमितोद्यानां सरोभिर्वृताम्॥ ९२

"उलगमुंड पेरुमाया"

त्रैलोक्यग्रसनोरुवक्त्रकुहर! प्रोद्दामकीर्ते! प्रभो!
नित्यव्यापिमहस्कदेह! महिमप्राग्भार! मज्जीवित!
सर्वक्ष्मातिलकायिताहिमहिभृद्वासिन्! ममाधीश्वर!
ब्रूहि त्वत्पदमाश्रये कथमहं त्वद्भक्तवंशोद्भवः? ९३

माद्यत्क्रूरनिशाचरौघमभितः छित्वा च दग्ध्वा क्षणात्
[1] मृत्प्रायं विरचय्य दक्षिणभुजे चक्रं प्रदीप्तं दधत्!
देवेश! अरुणपंकजांचितसरस्संशोभिशेषाचल-
स्थायिन्! ब्रूहि पदाबुजं प्रणयवान् सोहं कथं ते भजे॥ ९४

---

[1] मृत्प्रायं विरचय्य प्रदीप्तं चक्रं दधत्, इत्यन्वयः

पश्यत्सम्मोहदायिद्युतिजलदसदृग्वर्ण ! साश्चर्यचर्य !
स्वामिन् ! मच्चित्तभोग्यामृतरस ! भगवन् ! नित्यसूरीश ! मां त्वम् ।
वीचीविक्षिप्तमुक्तामणिकनकगणोद्भासितीरापगामिः
जुष्टे श्रीवेंकटाद्रौ कृतसदन ! विभो ! त्वत्पदाप्त्यै दयेथाः ९५

निर्दाक्षिण्यजगद्विहन्तृदनुजप्राणावलीशोषण-
ज्वालाजालशरौघवर्षुकधनुर्धारिन् ! रमावल्लभ !
देवव्रातमुनिव्रजार्तिवृषक्ष्माभृद्विहारिन् ! विभो !
त्वत्पादाम्बुजसन्निधिं कथमहं पापी व्रजेयं वद ॥ ९६

संहृत्यंचितसप्तसालदलनप्रौढैकधानुष्क ! भोः
नैरन्तर्यनिरूढसालयुगलध्वंसिन् ! जगत्कारण !
सन्नद्धास्बुधरोपमद्विपघटावासे वृषक्ष्माधरे
लब्धास्थान ! पटिष्ठशार्ङ्ग ! भवतः पादौ कदाहं श्रये ? ९७

विक्रान्तक्षिति तत्पदाब्जयुगलं शक्यं कदा सेवितुं
स्यादस्माभिरिति स्तुवद्भिरनिशं तैर्नित्यसूरिव्रजैः ।
कैंकर्यं करणैस्त्रिभिः बहुविधं कुर्वद्भि रध्यासिते
शेषाद्रौस्थिरवास ! ते पदयुगं दासः कदा विन्दतु ? ९८

मद्भोग्यामृत ! नित्यसूर्यधिपते ! जैत्राहिवैरिस्फुर-
त्केतो ! विम्बफलाधरोष्ठ ! भगवन् ! भोगिक्षमाभृन्मणे !
अस्मद्रक्षक ! दुष्कृतोत्थविविधव्याध्याधिदिव्यौषध !
त्वत्पादौ विरहय्य न क्षणमपि प्राणिम्यभाग्योपि सन् ॥ ९९

स्वत्पादेक्षणयोग्यभाग्यरहितोप्यर्हामि नो जीवितुं
त्वां हित्वेति स सूक्ष्मदृक् पशुपतिः ज्ञानी विधि वांसवः।
योषिद्भिस्सह यं श्रय, न्यहिगिरेस्तस्याधिप! त्वं यथा
कृष्णत्वे पितरौ, तथांचितगतिः मामेहि सम्मोहयन्॥ १००

त्वं द्वेष्येष्वतिदुर्ग्रहः सुलभवद्भासि, प्रियाणां पुनः
दूरे सन्निव सुग्रहोसि, विकसत्पद्माक्ष! बिम्बाधर!
माणिक्यद्युतिवासरायितनिशाहिक्ष्माभृदीश! क्षणं
मत्प्राणामृत! दोश्चतुष्क! न पदं हित्वा तव प्राणिमि॥ १०१

हित्वा न क्षणमस्मि जीवितुमहं शक्तेति पद्मालया-
नित्याश्लिष्टभुजान्तराल! विलसत्कीर्ते! जगद्धारक!
अस्मन्नायक! देवतापसगणैः सेव्ये वृषक्ष्माधरे
संवासिन्! शरणं त्वदीयचरणौ सोहं प्रपद्येऽगतिः॥ १०२

[1] देहात्मज्ञानहीनः स्वयमकृपि बहुप्राणिहिंसामसह्यां,
क्रूरोहं याचकेभ्यो हितवचनमपि प्रोक्तवानस्मि नैव।
गर्जन्मेघावलीभिः परिवृतकटके शीतले शेषशैले
लब्धावास! प्रभो! मां शरणमुपगतं पाहि पूर्णानुकम्पः॥ १०३

कामात् स्त्रीभुजवागुरासु पतितं, क्रोधादसच्चेष्टितं,
विद्वद्वृन्दविनिन्दकेन धनिनो लोभान्मया सेविताः।
विश्वासस्त्वयि रक्षकेपि न कृतः शेषक्षमाभृत्प्रभो!
दोषास्ते भुवि नैव सन्ति भगवन्! येषामहं नाश्रयः॥ १०४

---

[1] इदं पद्यं श्रीपरकालमुनेः "कोन्रेन् पल्लुयिरर्गळै" = इत्यस्याः द्रविडगाथायाः संस्कृतविवर्तः॥

अनादेः कालान्मां भवजलधिमध्ये क्षिपसि यत्
निबद्धं दर्माख्यैः यदपि दृढपाशैर्वितनुषे।
तवेदं स्वातन्त्र्यं न च विमनुयोज्यं त्वदितरैः
जगद्धेतो! सेतुर्मम गरुडकेतो! तव कृपा॥ १०५

मां गर्तेषु निपातयन्ति यदमी दुष्टेन्द्रियाश्वा मुहुः
यत्तापत्रितयाभिधैरपि मयि व्याघ्रैः पराक्रम्यते।
तां क्रीडामिव सद्विपत्तिमनिशं ते वीक्षमाणस्य चेत्
आनन्दानुभवो, हतोऽस्मि भगवन्! नैराश्यनित्याश्रयः॥ १०६

बुद्ध्वाप्यल्पमिति, क्षयोन्मुखमिति, प्राप्यं प्रयासैरिति,
क्षुद्रोदर्कमिति, प्रधावति मनः प्राप्तुं सुखं भौतिकम्।
तत्पारिप्लवशीलमेव सृजतः चित्तं मदीयं प्रभो!
मत्कापेयदिदृक्षुता त्वयि खलु स्पष्टैव शेषाद्रिप॥ १०७


दुष्टोऽयमागमगणोदितधर्मदूरः
इत्याकलय्य यदि मुंचसि न क्षतिर्मे।
शेषाद्रिनाथ! यतिराजपदाब्जभक्तिः
मां तारयेन्नियतमित्यवधारयामि॥ १०८

इति श्रीवत्सवंश्य-नल्लान्-चक्रवर्ति-श्रीनिवास-
रघुनाथाचार्यविज्ञापिता श्रीशेषाद्रीशस्तुतिः
समाप्ता॥

श्रीरस्तु

स्तुतिमणिमालिकायां

श्रीरङ्गपतिस्तुतिः



जयतु जगत्त्रयीजननरक्षणजक्षणकृत्
श्रुतिषु महो निगूढं, अधिगंगमहीन्द्रशयम्।
जयतु यतीशदर्शनमुदंचिततद्विभवं,
प्रशमितदुर्मतप्रसृतमोहतमःपटलम्॥ १

सपर्याभिः नानाविधमहितपूजापरिकर-
प्रणीताभिर्नित्यं रघुकुलनृपाणां प्रमुदितः।
प्रभुश्रीरङ्गेन्दुः शठरिपुमुखाचार्यविनुतः।
श्रिया सार्धं हृष्यन्मम हृदयसौधे विहरतु॥ २

चित्त! त्वं भज भृङ्गकीटकनयात् श्रीरङ्गनेतुः सदा
पद्मान्तस्सहवासतः करुणयाद्वैतं समास्थेदुषीम्।
तत्स्वातन्त्र्यमनंकुशं विदधतीं स्वापाङ्गभङ्गीवशं
क्षुद्रं मामपि नाथपादयुगले संयोजयन्तीं रमाम्॥ ३

सा श्रीरङ्गपुरी मदक्षिविषयो जायेत किं, पावनैः
कावेरीलहरीजलैः तनुरियं शुद्धिं किमानेष्यते?
श्रीमद्द्राविडदिव्यसूक्तिसुधया भक्तैस्समुद्गीतया
हृष्यन्नुत्पुलकः कदापि किमहं सेवेय रङ्गेश्वरम्? ४

शक्तं यद्यपि हस्तपादं, अनिशं कर्तव्ययात्राविधौ
पर्याप्तं च धनं, मनस्सुकुतुकोदग्रं, किमेतावता !
श्रीरङ्गेशमुखारविन्दसुषमापीयूषपानोत्सवः
यन्नाद्यापि जनुष्यलम्भि, तदिदं दौर्भाग्यसक्ष्णोर्मम ॥ ५

यावन्नैष्यति पोषिता बहुधनैः भस्मावशेषां गतिं
ज्वालामिर्दहनोत्करस्य परितो लेलिह्यमाना तनुः।
तावद्रङ्गनिधे ! विकीर्य करुणापीयूषवृष्टिं मयि
त्वत्पादांबुजसन्निधिं सकृदपि क्षेमेण संप्रापय ॥ ६

दृष्ट्वा रङ्गपतिर्ममैव दुरितव्रातं जुगुप्सावहं
क्षन्तुं नेच्छति, दूरतः परिहरति, औदास्यमालंबते।
शास्त्रज्ञानं, अभिज्ञवैष्णवकुलोद्भूतिः, सतां सङ्गतिः
सर्वं तन्मयि हन्त ! निष्फलमभूत् दौर्भाग्यसीम्नि स्थिते ॥ ७

नैराश्येन चिरादुपोषितवतीं, इत्थं मदीयां दृशं
कर्पूरद्रुचिकन्दलैः शिशिरयन् सान्द्रैस्स्वदेहोद्भवैः।
तैरिन्द्रादिसुदुर्लभैः सफलयन् तीर्थप्रसादादिकैः
आनन्दैकनिधान माकलितवान् मां रङ्गचन्द्रो ध्रुवम् ॥ ८

सूक्तैः श्रीशठकोपसूरिमुखपद्मोद्यन्मरन्दायितैः
श्रीमल्लक्ष्मणदेशिकेन्द्रविहितैः कैंकर्यसारैरपि।
श्रीरङ्गेश्वरमुन्मदिष्णुमनसं मय्युन्मुखं कुर्वती
वात्सल्यैकनिधिः करोति कुशलं श्रीरङ्गधामेश्वरी ॥ ९

[1] उन्निद्रहार्दानुभवैकसारं,
भावैरुदारैरभिनीयमानम्।
गीतामृतं श्रीशठकोपसूरेः
आशृण्वतां उत्पुलका तनुर्नः॥ १०

[2] (युग्मम्) प्राच्यां प्रसारितपदं, दिशि च प्रतीच्यां
विन्यस्तमौलि, धृतपृष्ठमधोत्तरस्याम्।
लङ्कामिमुख्यमसृणं प्रणयादवाच्यां,
ज्योतिः फणीन्द्रशयने श्रितयोगनिद्रम्॥ ११

प्रस्यन्धानमर्णवसवर्णरुचा, निविष्टं
श्रीरङ्गधामनि, विलोकितुमुत्सुकस्य।
वैवश्यमेति मम गात्रमिदं प्रसह्य
लोकाः! किमस्मि करवाणि विमूढचित्तः॥ १२

[3] पंचेन्द्रियाणि च निगृह्य, विशोध्य बुद्धिं
आधाय चाप्यपजयं यमतद्भटेषु।
रङ्गेश! लोकगणजक्षणसृष्टिदक्ष!
त्वन्नामकीर्तनवशात् मुदितोऽस्मि पश्य॥ १३

हरिन्मणिमहीधरोपमतनो! प्रवालाधर!
स्फुरत्कमललोचनाच्युत! सुरेश! गोपेश्वर।

---

[1] "अरयर्" इति व्यपदिष्टानां श्रीशठकोपाचार्येणलब्धानां वृद्धस्तामिनां अर्थाभिनयपूर्वकं द्रविडदिव्यगाथागानमिह श्रीरङ्गे प्रत्येकमासेव्यम्॥

[2] इदं श्लोकयुग्मं श्रीविप्रनारायणनामकभक्तांघ्रिरेणुमुनिकृतस्य 'कुडदिशै' इत्येतस्य द्रविडगीतस्य अनुवादः

[3] इदमपि १३- १४- पद्यद्वयं तस्यैव श्रीविप्रनारायणमुनेः तिरुमालै- प्रबन्धगतस्य आद्यद्रविडगीतद्वयस्य अनुवादः॥

इतीदृगमृतासवं नहि विहाय रङ्गप्रभो!
तदिन्द्रभुवनावनं तदपि भोगजातं घृणे॥- १४

अद्धा! मामकनेत्रगोचरमगात् श्रीपादयुग्मं जग-
द्धेतोः देवपतेः स्वभक्तनिवहे मां दासमातन्वतः।
शेषाद्रौ परमे पदे च महिते श्रीरङ्गपुर्यां समं
दीप्रस्य, अमलदिव्यमंगलगुणव्रातस्य लक्ष्मीपतेः॥ १५

[1] उद्दामहर्षजगदाक्रमणोद्यतस्य
ब्रह्माण्डघुष्टमकुटस्य मतिं मदीयाम्।
रक्षोविमर्दिविशिखस्य सुपुष्पवाट-
श्रीरङ्गनेतुः अकृषत्कटिपीतवासः॥ १६

मध्ये शेषधराधरस्य कपिभिः क्रीडाविलोलैः श्रिते
स्थित्वा निर्जरसेवितस्य, भुजगे सुप्तस्य रङ्गे पुरे।
सन्ध्याभ्रत्विषि पीतवाससि, विधेरुत्पत्तिहेतौ स्फुर-
दीप्तौ नाभिसरोरुहे च, हृदयं गाढावगाढं मम॥ १७

पंक्तिं यः शिरसां दृढोन्नतमहाप्राकारलंकापुरी-
नेतुः दिव्यशरेण राक्षसपतेः चिक्षेप मृत्पिंडवत्।
तस्य, अलिस्वनवर्हिलास्यविलसद्रङ्गेशितुर्भूषणं
सद्रत्नोदरबन्धनं विहरते चित्तं चमत्कृत्य मे॥ १८

---

[1] अथ, १५ श्लोकात्प्रभृति 'अमलनादिपिरान्' इति व्यपदिष्टस्य श्रीपाणयोगिविरचितद्रविडसाधादशकस्य संस्कृतानुवादः श्लोकदशकेन कृतः अवधेयः॥-

मत्पापौघं चिरपरिचितं कृत्स्नमुन्मूल्य चित्ते
प्राप्तावासो विवशयति मां रङ्गधुर्यः कृपालुः।
नाहं जाने किमकृषि तपस्तादृशं, तारहारैः
तद्दोर्मध्यं [1] जयति खलु, मामात्मसात्कृत्य दीव्यत्॥ १९

सितकरकलाशीर्षं पापाच्छिदं परिरक्षतः
भ्रमरविलसत्पुष्पारामाढ्यरङ्गपुरीपतेः।
सकलजगतीं अण्डैश्चौलैश्च सप्तभिरावृतां
सपदि निगिरन् कंठो मामेष हर्षयति प्रभोः॥ २०

हस्तोदंचितशंखचक्रविलसन्मूर्तेः, महीध्रोपमा-
कारस्य, उद्गतगन्धशालितुलसीमालाढ्यशीर्षस्य च
श्रीरङ्गे फणिभोगतल्पशयितस्यास्मत्प्रभोर्मायिनः
बिंबोष्ठः प्रसभं मदीयहृदयं कान्त्यंशुभिः वर्षति॥ २१

माद्यत्क्रूरहिरण्यदेहदलनप्रौढस्य, देवाधिपैः
अप्राप्यस्य च, धारकस्य जगतामाद्यस्य रङ्गप्रभोः।
आनीला मुखमण्डलेतिविपुला कर्णान्तलोलारुणा
वात्सल्येन विभासुराक्षियुगली मां दास्यमानीनयत्॥ २२

गर्भे न्यस्य जगन्ति सप्त च महान्यग्रोधपत्त्रे स्थितिं
प्राप्तस्य, आदिफणीन्द्रभोगशयने सुप्तस्य रङ्गे पुरे।
देवस्यांचितरत्नमौक्तिकमहाहारैर्विभान्ती तनुः
नीला निस्समवैभवा विवशयत्यन्तर्हाय चित्तं मम॥ २३

---

[1] जयति–सर्वोत्कर्षेण वर्तते॥

नीलाम्भोधरतुल्यदेहसुषमं, गोपालबालं, मुखे
गव्यं बिभ्रतं, अण्डवर्तिनिखिलाम्नौघस्य निर्वाहकम्।
मुष्णन्तं हृदयं मदीयमनिशं भोग्यं च पीयूषवत्
श्रीरङ्गेशमवेक्ष्य नेत्रयुगली नान्यत्र गच्छेन्मम। २४

नित्यं रङ्गपतिर्विमुह्यति सुधापायं श्रवोभ्यां पिबन्
श्रीमत्पाणमुनीन्द्रपाणिकमलालंकारवीणाध्वनिम्।
एकान्ते कमलापतिं मधुरया गीत्या समुल्लासयन्
योगी सोऽयमुपैति भाग्यमतुलं सूर्यन्तरैर्दुर्लभम्॥ २५

प्रदक्षिणनमस्कृतिप्रवणभक्तपादद्वयी-
परिक्रमणसम्भ्रमोद्वृतरजःकणैरास्तृते।
त्वदीयशुभमन्दिरे प्रसरदल्पकीटात्मना-
प्यमुं गलितकिल्बिषं जनय देव! रङ्गेन्द्र! माम्॥ २६

श्रीवैष्णवत्वविभवप्रधनाय वक्त्रे
श्रीपांचरात्रविहिताकृतिदर्शनीयः।
श्रीरङ्गराजगुणसुधारसमत्तभक्त-
श्रीपादरेणुः अलिके तिलकायतां नः॥ २७

उद्यन्ती वरदिव्यसूरिदशकात् प्रालेयशैलादिव
श्रीमद्भाष्यकृता भगीरथसमेनादिष्टमार्गाश्रया।
तीर्थज्ञेन च दर्शितावतरणा श्रीसौम्ययोगीन्दुना
श्रीरङ्गेश्वरसद्गुणामरसरित् मां नित्यमाप्लावयेत्॥ २८

पापाच्यते पापमिहास्मदीयं
दोदूयते तत्स्मरणान्मनोऽपि।
लोलूयतां त्वत्करुणालवित्रं
रङ्गेश! मत्कान् दृढकर्मबन्धान्॥ २९


स्वातन्त्र्यात्, अथ वापराधशतकं मत्कं विलोक्यांजसा
रोषात्, मां तव सन्निधौ निपतितं रङ्गेश! चेद्वर्जये:।
काचिन्नैव खलु क्षति:, गुरुकृतां भद्रप्रदां बिभ्रत:
श्रीमल्लक्ष्मणयोगिपादयुगलीसंबन्धमुद्रां मम- ३०

श्रीरङ्गपतिस्तुति:
समाप्ता॥

श्रीरस्तु

स्तुतिमणिमालिकायां

दिव्यदेशाधीशस्तुतिः



(श्रीकांच्यां वरदाधिराजस्तुतिः)

कल्याणदं भवतु हस्तिमहीधरशृङ्गे,
मौलौ च वेदवचसां, शठवैरिशीर्षे,
भक्तौघमानसगुहास्वपि दीप्यमानं
ज्योतिः चतुर्मुखमखप्रसवं चिरं नः॥ १

देवी प्रसारयतु मय्यनुकम्पनीये
देवाधिराजदयिता करुणाकटाक्षान्।
माद्यद्दुरन्तवृजिनव्रजभक्षणे य
द्धात्सल्यमंचतितरा मुदरम्भरित्वम्॥ २

संस्कारानुपलम्भितोऽस्मि गुरुभिश्चक्रांकनादीन्मुदा
किंचाप्राहिषि शास्त्रसारमनघैः प्रेम्णा विनीतो बुधैः।
शुद्धात्मानमुपायनीकृतमिवाचार्यैः अगृहीत मां
कारुण्येन शरण्यदम्पतियुगं श्रीहस्तिशैलाश्रयम् ३

(श्रीतिरुक्कुरुंगुडिपंचनंविस्तुतिः)

क्षेमायास्तु तिरुक्कुरुंगुडिपुरावासी गुणैः पूर्णतां
ज्ञानाद्यैः प्रकटय्य दृष्टिविषयः व्यूह्य स्वयं पंचधा।
रक्षासज्ज इवोत्थितः, स्थिरतयासीनः, शयानस्तथा,
क्षीराब्धौ, धरणीधरे च, निवसन् यः पाति पादान्तान्॥ ४

(श्रीतिरुमालिरुंशोलै सुन्दरबाहुस्तुतिः)

श्रीकूरेशकृताद्भुतस्तुतिशताविर्भूतहर्षोल्लस-
द्वक्त्राम्भोरुह ! नूपुरामरसरिद्धारासपेकोत्सुक !
श्रीमन् ! सुन्दरदोर्विलास ! भगवन् ! रामानुजीयोऽस्मि, त-
द्विस्रम्भात् तव पादयोः प्रणिपतन् नेयः कृपालक्ष्यताम्॥ ५

(श्रीविल्लिपुत्तूर् गोदादेवी स्तुतिः)

श्रीभूमिप्रमुखा भवन्ति महिलाः श्रीरङ्गभर्तुः प्रियाः
तास्सर्वा अपि विष्णुचित्ततनयासाम्यं कथं प्राप्नुयुः।
गीतैरद्भुतभावबन्धमधुरैः श्रव्यैस्सुशब्दोज्ज्वलैः
देवं प्रीणयति स्म या स्वकविताशिल्पश्रिया गुम्भितैः॥ ६

लावण्यामृतवीचिभिः, ललितया श्रीसूक्तिरत्नस्रजा,
केशासङ्गसमिद्धगन्धविगलन्मारन्दपुष्पस्रजा।
श्रीरङ्गाधिपतिं जडीकृतमनोमस्तिष्कमातन्वती
गोदा धन्विपुरोत्थकल्पलतिका कल्पेत न श्रेयसे॥ ७

(श्रीवानाचले देवनायकस्तुतिः)

वात्सल्यमुख्यगुणबृन्दमिहाप्रकाशं,
इत्याकलय्य भुवि तत्प्रकटीचिकीर्षुम्।
वैकुण्ठतः कमलया च सहावतीर्णं
श्रीदेवनायकमुपघ्नयतान्मनो नः॥ ८

श्रीदेवनायकमनःकुमुदेन्दुशोभां,
वानाद्रियोगिपितृभावनितान्ततृप्ताम्।
शेषाचलादुपगतां वरमङ्गलीं
ध्यायामि मे मनसि संसृतितापशान्त्यै॥ ९

(श्रीतिरुवळ्ळूर् वीरराघवस्तुतिः)

नीत्वा क्षयं त्रिदशवैरिगणं समूलम्।
लंकाधिपं च विरचय्य विभीषणं तम्।
देवश्चिराय कृतकृत्य इवादिशेषे
श्रीवीरराघवविभुः शयितोऽवतान्नः॥- १०

सविभ्रमविलोकनैः सरसमन्दमन्द स्मितैः
अनंगरसवर्द्धनैः स्वतनुवल्लरीवेल्लनैः।
प्रियं रघुपतिं मुहुः विवशयन्नहो! मादृशान्!
दयावति! रिरक्षिषुः कमकवल्लि! पापाश्रयान्॥- ११

(श्रीतिरुमळिशै भक्तिसारमुनिस्तुतिः)

प्रसीदतु महामुनिर्मयि स भक्तिसाराभिधः।
स्वयोगमहिमार्दितत्रिपुरवैरिनेत्रानलः।
यथेष्टविनियोज्यतां भजति यस्य लक्ष्मीपतिः
वहन् विवृतवैभवामिव यथोक्तकारिप्रथाम्॥- १२

(श्री आळ्वार- तिरुनगरिशठकोपमुनिस्तुतिः)

प्रणीतविष्णुवैभवाः परीहसन्ति या त्रयीं
परस्वरूपनिर्णये पराङ्मुखीमशक्तितः।
प्रकाशयन्तु सन्ततं स्वमर्थजातमूर्जितं
हठादपास्य मे तमः, शठारिदिव्यसूक्तयः॥- १३

(श्रीभूतपुर्यां भगवद्रामानुजस्तुतिः)

तत्त्वं निदर्शयितुमागममौलिसारम्,
आचार्यपीठमधितस्थुषि लक्ष्मणार्ये।

फुल्लानि चित्तकमलानि सतां बुधानां,
धर्मो जहर्ष, कलिरश्रुजलं ववर्ष ॥ १४

सौम्योपयन्तृमुनिरूपतया मदीयां
आस्थाय राजति सदार्चनपेटिकां यः ।
श्रुत्यन्तवाक्तिसमन्वयजागरूकं
रामानुजार्यमगतिः तमहं प्रपद्ये ॥ १५

शक्तस्त्वमेव यतिराज ! भवाम्बुधेर्माम्
उद्धर्तुं, अन्यदहमत्र न वेद्मि दैवम् ।
त्वद्भक्तिभावितहृदां जनितोऽस्मि वंशे,
नंक्ष्याम्यहं यदि तवैव किलापकीर्तिः ॥ १६

शान्त्याद्यात्मगुणैः प्रसन्नमधुरा त्रय्यन्तपाथोनिधिं
निर्मथ्यार्तजनाय साधु ददती श्रीविष्णुतत्त्वामृतम् ।
काषायांवरवेष्टिता च विलसद्दिव्योर्ध्वपुंड्रांचिता
मूर्तिः श्रीयतिशेखरस्य पुरतो भायान्मदक्ष्णोश्चिरम् ॥ १७

कामं केचन देशिकाः कृतधियश्शास्त्रेषु दीव्यन्तु तान् ।
न ध्यायेन्मम मानसं धृतरति श्रीलक्ष्मणार्ये मुनौ ।
न्यक्कृत्यापि गुरोर्निदेशमुदयत्कारुण्यपुण्यात्मना
येनाष्टाक्षरमन्त्रसारमखिलक्षेमार्थमुद्घोषितम् ॥ १८

(अथ कतिपयानां 'इरामानुशनूत्तंदादि" नामकद्रविडप्रबन्धस्थितगाथान्तां संस्कृतानुवादश्लोका :।)

"शुरक्कु तिरुवुमुणर्वुम्"

स्यात् सम्पत्तिर्मतिरपि, सुधास्यन्दि वक्त्रं तदुक्त्या
स्यात्, पापानि प्रविलयमियुः, भो मनुष्याः ब्रुवे वः।
धर्मध्वंसाकुलकलिवलोन्मूलनोद्यत्प्रभाव-
श्रीमद्रामानुजगुरुमणेः ब्रूत नाम्नैव नित्यम्॥ १९

"शोल्लार् तमिळोरुमून्रुम्"

सच्छब्दांचद्द्रविडफणितीः आगमानां चतुष्कं
धर्माध्वानं निरवधिमसौ वेत्ति रामानुजार्यः।
सद्वन्द्यस्यामितगुणनिधेः नामधेयं न तस्य
प्राहुर्लोकाः, विदधति मुधा पूरुषार्थस्य चिन्ताम्॥ २०

"पेरोन्रु मत्तिल्लै"

प्राप्यं त्वत्पदपंकजान्न हि परं, तस्मात्पदाब्जात्परं
नापि प्रापकं, इत्यमुं सुकृतिनां विश्वासमासेदुषाम्।
त्रातारं मम चात्मदानविधया, रामानुजार्यं न ख-
ल्वौदार्यैकनिधिं पणायितुमहं शक्नोमि याथार्थ्यतः॥ २१

"कूरु शमयंगळ्"

प्रध्वंस्य क्षितिमंडले प्रविततां तां बाह्यषड्दर्शनीं
दीव्यन्तीषु शठारिसूक्तिषु महद्विज्ञानमाविभ्रतम्।
विस्रम्भं परिकल्प्य मे हृदि कृतावासं दिगन्तोल्लसत्-
साद्गुण्यं करणत्रयेण सततं रामानुजार्यं भजे॥ २२

" ईरँजप्पडुं "

सेव्यत्वेन प्रसिद्धं परममधिपतिं रङ्गनाथं धरण्यां
साक्षाद्धर्मस्वरूपं यतिकुलतिलकः ख्यापयन्मत्प्रभुस्सः
क्षिप्त्वा मत्किल्बिषौघं मनसि मम दिवारात्रमिद्धप्रकाशः।
जागर्ति, आस्ते न कश्चिज्जगति मम तुलामीयिवानत्र धन्यः॥ २३

" निगरिन्रि निन्र "

दौरात्म्यं मम निस्तुलं तव कृपां हित्वा न मृष्यं परैः
नैषा त्वत्करुणापि लब्धविभवा लक्ष्यं तदेनद्विना।
सर्वज्ञैरभिनन्द्यवैभव! यतिक्ष्मानाथ! हन्तावयोः
सिद्धेऽर्थेत्र परस्परं समुचितो विश्लिष्य वासः कथम्? २४

" आनदृशेम्मै "

रम्याम्भोरुहमाकरन्दतटिनीसंसिक्तकेदारयुक्-
च्छ्रीरङ्गेश्वरपादयुग्ममनिशं मूर्ध्ना वहंस्तत्परः।
श्रीरामानुजयोगिराडुदभवत् भूमौ यदा, ऽभूत्तदा
धर्मस्योन्नतिः, आस्त दुर्मतहतिः, जज्ञे कलेश्च क्षतिः॥ २५

मम हृदि विजरीहरीतु नित्यम्
यतिवरनिर्मितभव्यभाष्यसूक्तिः।
अनुकलमनुसन्दधातु सैषा
मम रसना यतिराजवैभवानि॥- २६

(श्रीसिंहाचले लक्ष्मीनृसिंहस्तुतिः- सुप्रभातं च)

यदीयं माहात्म्यं न हि भवति माद्दग्जनवचो-
विचार्यं, धार्यं यत्पदममरवर्गैस्वशिरसि।

निषण्णः सिंहाद्रौ विविधतरुषंडावृततटे,
नृसिंहस्वामी मे भवभयमनन्तं विदलयेत्॥ २७

विस्रम्भलेशमपि शास्त्रगणे न कुर्वे
धर्मोऽपि नैव विहितो महितस्तथापि।
रामानुजार्यपदपंकजभक्तिभाजां
दासोऽस्मि पालय नृसिंह! सदा विशंकः॥ २८

॥ सुप्रभातम् ॥

प्राच्यगिरिश्रृंगमधिरोहति दिनेशः
वारिजकुलं विकचमिन्दुरपशोभः।
श्रोत्रसुखदायिविहगावलिविरावैः
जागृहि नृसिंह! वरसिंहगिरिवासिन्! २९

त्वां मधुरगीतिरुपवीणयितुमेषः
नारदमुनिर्निखिलयोगिमिरुपेतः
वारिधिसुतासहित! भोगिवरशायिन्!
जागृहि नृसिंह! वरसिंहगिरिवासिन्! ३०

गर्वभरदुर्ललितशर्वधृतशुंभत्-
क्षुद्रशरभाकृतिविनाशकृतिशालिन्!
पालितसुपर्वगण! भक्तजनरक्षिन्!
जागृहि नृसिंह! वरसिंहगिरिवासिन्! ३१

दैत्यवरनाशकरहेतिधरबाहो!
क्षोभण! सटापटलभीषणमुखाब्ज!

रक्षितुमुपैहि दुरितौघनिरतान्नः
जागृहि नृसिंह! वरसिंहगिरिवासिन्! ३२

सर्वनिगमान्तगणकाननविचारिन्!
धन्यतमयोगिवरमानसविहारिन्।
रम्यघृणिदिव्यमणिभूषणविभासिन्।
जागृहि नृसिंह! वरसिंहगिरिवासिन्॥ ३३

स्तवनमिदं नरसिंह-प्रबोधनौपयिकमधुर-
पदबन्धम्। प्रत्यहमनुसन्दधतां, उन्मीलति
सम्पदितरदुरवापा॥- ३४

(श्रीगोदापुरीशसीतापतिस्तुतिः)

(कुलकम्)- भद्रभूधरसुरद्रुमभावं,
प्राप्य तत्र चिरकालमुषित्वा।
उत्सवादिकमुपेत्य च कृष्णा-
तीरवासिजनपालनकामः॥ ३५

नलसिंहदर्शतिथ्यां- तिरुमलगुरुवर्यमधिक-
या दयया। चरितार्थितजन्मानं, स्वदिव्य-
रूपं प्रदर्श्य तन्वानः॥ ३६

सिद्धार्थि चैत्रशुक्ले-पंचम्यां रोहिणीं गते
चन्द्रे। लग्ने वृषभाभिख्ये। सुमहितनिगमो-
क्तसरणिमनुसृत्य॥ ३७

मन्त्रराजशोभियन्त्रपीठिकामधिष्ठितः।
श्रान्तिहारिहेतिराजिभासिबाहुमण्डलः।
वामसक्थिमैथिलिः भयघ्नमुद्रयांचितः।
[1]जानकीप्रहर्षदायिदासवर्यसेवितः। ३८

आभानुहिमकरक्षं, मादृग्दासजनपालना-
यैव। गोदापुरमलमकरो-दितिशिंगरदेशिक-
स्तुतस्वात्मा॥ ३९

अस्मादृशां नतिततीः परिगृह्य, सर्वान्
दोषानपास्य दयया परिपालयन् सन्।
अत्रैव मंगलशतं समुपैतु नित्यं,
सीतापतिस्स भगवान् कुलदैवतं नः॥ ४०

[2] सकलमंगलकारिगुणाश्रयं,
निमिकुलोत्थसुवर्णमरुल्लताम्।
रघुपतिप्रमदावहसद्गुणां,
प्रथमकाव्यपणायितवैभवाम्॥ ४१


वात्सल्यादिगुणप्रकाशनकृते नानावतारांचिताम्
भद्रक्षोणिधराग्रसन्मणिस्खनिं लोकाधिहारीक्षणाम्।
श्रीवात्स्यस्य महात्मनः तिरुमलाचार्यस्य मौलौ निधिम्
श्रीमच्छिंगरमिश्रशिष्यजलधेः शीतांशुदीव्यत्कलाम् ४२

---

[1] जानकीप्रहर्षदायिदासवर्यः- हनुमान्।
[2] सकलेत्यादि (41-42-43) श्लोकत्रयस्य एकवाक्यत्वम्॥

कृष्णानदीविमलतीरकृतस्थितिं तां,
गोदापुरीश्वरसखीमतिवेलभक्तिः।
सेवेय तद्गुणगणान् सततं स्मरेयम्।
स्यामप्यहं क्षपितकिल्बिषधन्यजन्मा ॥- ४३

इति दिव्यदेशाधीशस्तुतिः समाप्ता ॥



वात्स्यश्रीरघुनाथार्य-वचःकैंकर्यरूपिणी
सतां कर्णोत्सवायास्तु-सुस्तोत्रमणिमालिका ॥



